संस्कृत-वार्ता:
25-07-2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- वर्तमानवर्षस्य वित्तसङ्कल्पनापत्रस्य विषये संसदः उभयोः सदनयोः पुनः चर्चा समारब्धा।
- प्रधानमन्त्री नरेन्द्र मोदी श्वः कारगिलविजयदिवसस्य अवसरे कारगिलयुद्धस्मारकस्य भ्रमणं करिष्यति।
- विदेशमन्त्री डा. एस जयशंकर आसियान-सङ्घटनसभासु भागं ग्रहीतुं त्रिदिवसीययात्रायै लाओसनगरं प्राप्तवान्।
- भारतीय-ऋतुविज्ञान-विभागेन उक्तमस्ति यत् देशस्य पश्चिममध्य-भागेषु तीव्रवर्षाया संभावना कतिपय दिनं यावत् अस्तीति।

एशियाचषकक्रिकेट्प्रतियोगितायाः उपान्त्यचक्रयोः भारतं बाङ्ग्लादेशं विरुध्य तथा च श्रीलंका पाकिस्तानं विरुध्य क्रीडिष्यति।

<u>संसदः सदनयोः चर्चा</u>

अद्य संसदः उभयोः सदनयोः वित्तसङ्कल्पनापत्रस्य विषये संसदः उभयोः सदनयोः पुनः चर्चा समारब्धा। संसदीयकार्याणां मन्त्री किरेन् रिजिजु अद्य विपक्षनेतारः देशस्य जनादेशस्य अपमानं कुर्वन्ति इति आरोपं कृतवान्। नवदिल्लीनगरे पत्रकारसम्मेलनं सम्बोधयन् श्रीरिजिजुः अवदत् यत् देशः द्रष्टुम् इच्छति यत् वित्तसङ्कल्पनापत्रविषये चर्चा उत्तमरीत्या सार्थकरूपेण च भवेत्। सः एवमपि अवदत् यत् केषाञ्चन दलानाम् नेतारः यथा टिप्पणीं कृतवन्तः, तथा च तेषां भाषणानि सदनस्य गौरवं न्यूनीकृत्य सदनं अपमानितम्। सः विपक्षदलेभ्यः जनानां जनादेशस्य आदरं कर्तुं आह्वानं कृतवान्। प्रधानमन्त्रिणः भाषणांशान् समुद्धरन् श्रीरिजिजुः उक्तवान् यत् निर्वाचनानि समाप्तानि सन्ति अधुना विकसितभारतस्य दिशि कार्यं कर्तुं केन्द्रीय-वित्तसग्कल्पनापत्रस्य विषये रचनात्मकचर्चायां च ध्यानं भवेत्। सः आरोपितवान् यत् विपक्षनेतारः सङ्कल्पनापत्रस्य विषये किमपि न वदन्ति, परन्तु ते केवलं राजनीतिकरणे एव प्रवृत्ताः सन्ति । संसदीयकार्याणां मन्त्री उक्तवान् यत् अस्मिन् सत्रे केवलं आयव्ययप्रपत्रस्य विषये चर्चा कर्तव्या। कृषकाणाम् आदिवासिनां च कृते निर्मितस्य वित्तसङ्कल्पनापत्रस्य प्रावधानानां चर्चां कर्तुं विपक्षस्य पलायनस्य विषये सः प्रश्नं कृतवान्।

कारगिलविजयदिवसः

प्रधानमन्त्री नरेन्द्र मोदी श्वः कारगिलविजयदिवसस्य अवसरे कारगिलयुद्धस्मारकस्य भ्रमणं करिष्यति। सः कर्तव्यपथि आत्मबलिदानं कृतवद्भ्यः सैनिकेभ्यः श्रद्धाञ्जलिं समर्पयिष्यति। श्रीमोदी शिङ्कुनला -गुहामार्गपरियोजनायाः प्रथमविस्फोटमपि दृश्यश्रव्यप्रणाल्या करिष्यति। लेह्-नगरं प्रति सर्वविधऋतौ सम्पर्कं प्रदातुं निमु-पदुम-दर्चा-मार्गे प्रायः एषा गुहा निर्मिता भविष्यति । शिङ्कुन ला गुहामार्गः न केवलं अस्माकं सशस्त्रसेनानाम् उपकरणानां च द्रुतगत्या कुशलतया च प्रापणं सुनिश्चितं करिष्यति अपितु लद्दाखस्य आर्थिकसामाजिकविकासम् अपि पोषयिष्यति।

विदेशमन्त्री त्रिदिवसीययात्रा

विदेशमन्त्री डा. एस जयशंकर आसियान-सङ्घटनसभासु भागं ग्रहीतुं त्रिदिवसीययात्रायै लाओसनगरं प्राप्तवान्। विदेशमन्त्री डॉ. एस जयशंकरः अद्य आसियानसङ्घस्य विदेशमन्त्रिणां सभासु भागं ग्रहीतुं त्रिदिनानां भ्रमणार्थं लाओस्-देशस्य विएन्टियान्-नगरं प्राप्तवान्। डॉ जयशंकरः सामाजिक-माध्यमेन सूचनां प्रदत्तवान् यत् भारतस्य एक्ट ईस्ट्-नीतेः दशकस्य अवसरे आसियान-सङ्घटनेन सह भारतस्य सम्बन्धं अधिकं सुदृढं कर्तुं सः उत्सुकः वर्तते। विदेशमन्त्री अन्यदेशेभ्यः स्वसमकक्षैः सह अपि आसियानसम्बद्धसमागमानाम् अन्तर्गतं वियन्टियान्नगरे द्विपक्षीयसमागमं करिष्यति इति अपेक्षते। विदेशमन्त्रालयेन उक्तं यत् आसियान-केन्द्रित-क्षेत्रीय-वास्तुकलायां भारतस्य गहन-सङ्गतिः महत्त्वं रेखांकयति।

राष्ट्रपति

राष्ट्रपति द्रौपदीमुर्मू स्वकार्यकालस्य वर्षद्वयपूर्त्यवसरे अद्य डॉ. राजेंद्र प्रसाद केंद्रीयविद्यालयस्य नवमकक्ष्यायाः छात्रान् पाठितवती। छात्रैः सह वार्तालापावसरे ताभिः आधुनिक-काले उत्पद्यमानानां विभिन्न-समस्यानां विषये चर्चा कृता। ऋतुपरिवर्तनस्य आह्वानानां विषये राष्ट्रपतिः छात्रान् पर्यावरणं रक्षितुं 3आरत्रयस्य अर्थात् , रिड्यूस, रीयूज रीसाइकिल चेत्येतेषां पालनं कर्तुम् उक्तवती ।

बेन्जामिन नेतन्याहू-अमेरिकीय संसदि

इजरायदेशस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू अद्य अमेरिकीय संसदि सम्बोधनं कृतवान् फिलीस्तीन-क्षेत्रे नवमासाधिकं यावत् संघर्षस्य अनन्तरं अन्ताराष्ट्रिय-आलोचनानां मध्ये सः स्वभाषणे अमेरिकीय-समर्थनस्य विशेषतः चर्चां कृतवान्।

नेतन्याहूः उक्तवान् यत् इजरायल् बन्धकान् मुक्तान् कर्तुं तथा च तान् सुरक्षितान् आनेतुं सक्रियरूपेण कार्यं कुर्वन् अस्ति। इजरायलस्य प्रधानमन्त्रिणः भाषणं सिनेट्-प्रतिनिधिसदनस्य संयुक्तसभायां विदेशीयनेतृणां अभिलेखात्मकं चतुर्थं भाषणं आसीत्।

आई बी एम

ऋतुविज्ञान विभागेन उक्तमस्ति यत् कोंकण-गोवा-मध्यमहाराष्ट्रस्य च कतिपय भागेषु तीव्रवर्षाया संभावना अस्तीति। विभागेन इदमपि उक्तमस्ति अद्य सौराष्ट्र-कच्छ-विदर्भ-मराठवाड़ा-इत्यादिषु क्षेत्रेष्वपि उत्कटवर्षाया: सम्भावना वर्तते। मध्यप्रदेश च श्व: वर्षा भविष्यति। महाराष्ट्रे तीव्रवर्षया पुणे-नगरस्य जनपद-नागर मार्गा: सन्ति प्रभाविता:। मुम्बई नगरस्य कतिपयभागेषु जलसंचयत्वात् यातायातव्यवस्था प्रभाविताऽस्ति, उपनगरीयरेल सेवाऽपि विलम्बेन प्रचलन्त्यस्ति। गुजरातराज्ये सूरत नवसारी वलसाड अथ दमनदादरा-नगरहवेलीत्यत्र च मूसलधारावर्षाया: सम्भावनत्वात् काषायी संचेतना अस्ति निस्सारिता।

अरविन्द केजरीवालस्य निगडनम् :

दिल्लीप्रदेशस्य राउस् एवेन्यू न्यायालयेन अद्य कराधाननीतिप्रकरणे दिल्ल्याः मुख्यमन्त्रिणः अरविन्द-केजरीवालस्य नैय्यायिककारावास: अगस्तमासस्य अष्टमदिनाङ्कपर्यन्तं विस्तारितः। केजरीवालः अस्मिन् प्रकरणे केन्द्रीयान्वेषणाभिकरण (सीबीआई) इत्यस्य अनुशंसया न्यायवादप्रकरणं सम्मुखीकरोति। सः तिहाड़कारागारात् चलचित्रीय-सम्मेलनद्वारा न्यायालयस्य साम्मुख्यं करोति। पूर्वं कराधाननीतिविषये प्रवर्तननिदेशालयेन नियोजिते धनशोधनप्रकरणे सर्वोच्चन्यायालयेन केजरीवालाय अस्थायिमुक्तिः जुलैमासस्य 12 दिनाङ्के दत्तासीत्।

महिला एशिया कप क्रिकेट सेमीफाइनल:

एशियाचषकक्रिकेट्प्रतियोगितायाः उपान्त्यचक्रयोः भारतं बाङ्ग्लादेशं विरुध्य तथा च श्रीलंका पाकिस्तानं विरुध्य क्रीडिष्यति। उभे क्रिकेट्स्पर्धे दांबुलायां भविष्यतः । श्रीलंकादलं ह्यः दांबुलायां थाईलैंडं दशस्तोभैः पराजितवत्।

।। इति वार्ता: ।।